# Year- end Vedanta Course for Adults – 2020

## (December 24 -31, 2020)

with



***Swami Tattvavidanandaji***

***On***

## *Sad-darshanam – VIII*

***(Sri Ramana Maharshi)***



## and

## Valmiki Ramayana- Sundar Kanda...contd

**also Sanskrit, Chanting and Music classes**

**with**

**Br. Suryanarayana and Chitra Rajan**


**Arsha Vidya Gurukulam, P. O. Box 1059, Saylorsburg. Pa.18353**

**Email: avpoffice@gmail.com, website: www.arshavidya.org**

# Śanti Mantras

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

*om sa ha nāvavatu | sa ha nau bhunaktu |saha vīryaṁ karavāvahai |*
*tejasvināvadhītamastu | mā vidviṣāvahai || om śāntiḥ śāntiḥ śāntiḥ || 1 ||*

***saḥ*** -- he; ***ha*** -- indeed; ***nau*** -- both of us; ***avatu*** – may protect; ***saḥ*** -- he; ***ha*** -- indeed; ***nau*** -- both of us; ***bhunaktu*** – may nourish; ***saha*** – together; ***vīryaṁ karavāvahai*** – may we acquire the capacity (to study and understand the scriptures); ***tejasvi*** – brilliant; ***nau*** -- for us; ***adhītam*** – what is studied; ***astu*** -- let it be; ***mā vidviṣāvahai*** -- may we not disagree with each other; ***om śāntiḥ śāntiḥ śāntiḥ*** -- om peace, peace, peace

May the Lord indeed, protect both of us. May he indeed, nourish both of us. May we together acquire the capacity (to study and understand the scriptures). May our study be brilliant. May we not disagree with each other. Om peace, peace, peace.

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

*om pūrṇamadaḥ pūrṇamidaṁ pūrṇātpūrṇamudacyate |*
*pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||*
*om śāntiḥ śāntiḥ śāntiḥ || 2 ||*

***pūrṇam*** – is fullness; ***adaḥ*** -- that; ***pūrṇam*** – is fullness; ***idaṁ*** -- this; ***pūrṇāt*** – from that fullness; ***pūrṇam*** – this fullness; ***udacyate*** – has come; ***pūrṇasya*** – of that fullness; ***pūrṇam*** – this fullness; ***ādāya*** – having removed; ***pūrṇam*** – the fullness; ***eva*** – only; ***avaśiṣyate*** – remains; ***om śāntiḥ śāntiḥ śāntiḥ*** -- om peace, peace, peace

That is fullness, this is fullness. From that fullness this fullness came. From that fullness this fullness removed, what remains is fullness. Om peace, peace, peace.

# Guru Vandanam

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥

śrutismṛtipurāṇānām ālayaṁ karuṇālayam |
namāmi bhagavatpādaṁ śaṅkaraṁ lokaśaṅkaram ||

***śruti-smṛti-purāṇānām*** – of the śruti (Vedas), smṛti (Gitā etc.) and the purāṇās. ***ālayaṁ*** -- the abode; ***karuṇālayam*** – the repository of compassion; ***namāmi*** – I salute; ***bhagavat-pādaṁ*** -- one who is revered; ***śaṅkaraṁ*** -- Ādi Śankarācārya; ***loka-śaṅkaram*** – the one who gives happiness to the world.

I salute Ādi Śankarācārya, the abode of the śruti (Vedas), smṛti (Gitā etc.) and purāṇās, the repository of compassion, who gives happiness to the world and who is revered.

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

śaṅkaraṁ śaṅkarācāryaṁ keśavaṁ bādarāyaṇam |
sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ ||

***śaṅkaraṁ*** -- Lord Śiva; ***śaṅkarācāryaṁ*** -- the great teacher Ādi Śankarācārya; ***keśavaṁ*** -- Lord Viṣṇu ; ***bādarāyaṇam*** -- Śri Vyāsa; ***sūtra-bhāṣya-kṛtau*** – the two who worte the aphorisms (*BrahmaSūtras*) and the commentary (*bhāṣya*); ***vande*** – I salute; ***bhagavantau*** -- the venerable ones; ***punaḥ punaḥ*** -- again and again.

I salute, again and again, the great teacher Ādi Śankarācārya, who is Lord Śiva, and Badarayana, who is Lord Viṣṇu, the venerable ones who wrote the *bhāṣya* and the *BrahmaSūtras* respectively.

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

īśvaro gururātmeti mūrtibhedavibhāgine |
vyomavadvyāptadehāya dakṣiṇāmūrtaye namaḥ ||

***īśvaraḥ*** -- the Lord; ***guruḥ*** – the teacher; ***ātmā*** – the Self; ***iti*** – thus; ***mūrti-bheda-vibhāgine*** – the one who appears (as though) divided; ***vyomavat*** – like space; ***vyāpta-dehāya*** – to the one who is all pervasive; ***dakṣiṇāmūrtaye*** – to Lord Dakṣiṇāmūrti; ***namaḥ*** -- salutation.

Salutation to Lord Dakṣiṇāmūrti who is all pervasive like space, but who appears (as though) divided as the Lord, the teacher and the Self.

## *Sad darśanam* - VIII

सिद्धस्य वित्तिस्सत एव सिद्धिस्स्वप्नोपमानाः खलु सिद्धयोऽन्याः ।
स्वप्नः प्रबुद्धस्य कथं नु सत्यस्सति स्थितिः किं पुनरेति मायाम् ।।

*siddhasya vittissata eva siddhissvapnopamānāḥ khalu siddhayo'nyāḥ,*
*svapnaḥ prabuddhasya kathaṃ nu satyassati sthitiḥ kiṃ punareti māyām. 37*

सोऽहंविचारो वपुरात्मभावे साहाय्यकारी परिमार्गणस्य ।
स्वात्मैक्यसिद्धौ स पुनर्निरर्थो यथा नरत्वप्रमितिर्नरस्य ।।

*so'haṃvicāro vapurātmabhāve sāhāyyakārī parimārgaṇasya,*
*svātmaikyasiddhau sa punarnirartho yathā naratvapramitirnarasya. 38*

द्वैतं विचारे परमार्थबोधे त्वद्वैतमित्येष न साधुवादः ।
गवेषणात्प्राग्दशमे विनष्टे पश्चाच्च लब्धे दशमत्वमेकम् ।।

*dvaitaṃ vicāre paramārthabodhe tvadvaitamityeṣa na sādhuvādaḥ,*
*gaveṣaṇātprāgdaśame vinaṣṭe paścācca labdhe daśamatvamekam. 39*

करोमि कर्मेति नरो विजानन् बाध्यो भवेत्कर्मफलं च भोक्तुम् ।
विचारधूता हृदि कर्तृता चेत्कर्मत्रयं नश्यति सैव मुक्तिः ।।

*karomi karmeti naro vijānan bādhyo bhavetkarmaphalaṃ ca bhoktum,*
*vicāradhūtā hṛdi kartṛtā cetkarmatrayaṃ naśyati saiva muktiḥ. 40*

बद्धत्वभावे सति मोक्षचिंता बंधस्तु कस्येति विचारणेन ।
सिद्धे स्वयं स्वात्मनि नित्यमुक्ते क्व बन्धचिन्ता क्व च मोक्षचिन्ता ।।

*baddhatvabhāve sati mokṣacintā bandhastu kasyeti vicāraṇena,*
*siddhe svayaṃ svātmani nityamukte kva bandhacintā kva ca mokṣacintā. 41*

रूपिण्यरूपिण्युभयात्मिका च मुक्तिस्त्रिरूपेति विदो वदंति ।
इदं त्रयं वा विविनक्त्यहंधीस्तस्याः प्रणाशः परमार्थमुक्तिः ।।

*rūpiṇyarūpiṇyubhayātmikā ca muktistrirūpeti vido vadanti,*
*idaṃ trayaṃ vā vivinaktyahandhīstasyāḥ praṇāśaḥ paramārthamuktiḥ. 42*

सद्दर्शनं द्राविडवाङ्निबद्धं महर्षिणा श्रीरमणेन शुद्धम् ।
प्रबंधमुत्कृष्टममर्त्यवाण्यामनूद्य वासिष्ठमुनिर्व्यतानीत् ।।

*saddarśanaṃ dravāḍavāṅnibaddhaṃ maharṣiṇā śrīramaṇena śuddham,*
*prabandhamutkṛṣṭamamartyavāṇyāmanūdya vāsiṣṭhamunirvyatānīt. 43*

सत्तत्त्वसारं सरलं दधाना मुमुक्षुलोकाय मुदं ददाना। अमानुषश्रीरमणीयवाणीमयूखभित्तिर्मुनिवाग्विभाति ।।

*sattattvasāraṃ saralaṃ dadhānā mumukṣulokāya mudaṃ dadānā,*
*amānuṣaśrīramaṇīyavāṇīmayūkhabhittirmunivāgvibhāti. 44*

हरिः ओम्, तत्सत्, श्रीकृष्टार्पणमस्तु ।।

* * * * *

।। श्रीरामजयम् ।।

# ।। संस्कृतबालादर्शः ।।

(SAMSKRITA BALADARSA)

त्रिंशः पाठः ॥ ३० ॥

## उपदेशमाला

(Collection of Instructive Verses).

नभसो भूषणं चन्द्रो
नारीणां भूषणं पतिः ।
पृथिव्या भूषणं राजा
विद्या सर्वस्य भूषणम् ॥ १

माता शत्रुः पिता वैरी
येन बालो न पाठितः ।
न शोभते सभामध्ये
हंसमध्ये बको यथा ॥ २

क) प्रश्नाः—

१. सर्वस्य भूषणम् किम्? २. कः सभामध्ये न शोभते?

ख) निर्दिष्टैः पदैः वाक्यानि पूरयत—

१. सुशीला नारी गृहस्य — (भूषण) ।
२. सुपुत्रः कुलस्य — (आभरण) ।
३. सुशिष्यः गुरोः प्रीतेः — (पात्र) ॥

१. नारी *f* a lady
पृथिवी *f* earth
२. पाठितः *a. m.* was taught
सभा *f* assembly
हंसमध्यं *n.* midst of swans
बकः *m.* a crane

पुस्तकस्था च या विद्या
परहस्ते च यद्धनम् ।
कार्यकाले समायाते
न सा विद्या न तद्धनम् ॥ ३

सुखार्थी चेत् त्यजेद्विद्यां
विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखार्थिनः कुतो विद्या
कुतो विद्यार्थिनः सुखम् ॥ ४

---

क) प्रश्नाः—३. का न विद्या, किं न धनम् ?
४. विद्यार्थी सुखार्थी च किं किं त्यजेताम् ?

ख) प्रयोगः त्रिविधः (Three kinds of Voices)—

१. कर्तरिप्रयोगः Active Voice
i. (सकर्मकः) { नम् + अ + ति = नमति, Example पुत्रः पितरं नमति ॥
ii. (अकर्मकः) { जि (जय्) + अ + ति = जयति । Example धर्मः जयति ॥

२. कर्मणि प्रयोगः* Passive Voice { नम् + य + ते = नम्यते । Example पुत्रेण पिता नम्यते ॥

३. भावे प्रयोगः Impersonal Voice { जि + य + ते = जीयते । Example धर्मेण जीयते ॥

Note : * In कर्मणि प्रयोग the subject takes तृतीया and the object takes प्रथमा-Verb must agree to the object in number and person.

एकविंशः पाठः ॥ २१ ॥



## द्वौ सखायौ

अतीव । प्रभूतम् । श्रेष्ठी । वित्तम् ।

पूर्वं चोलदेशे द्वौ सखायावास्ताम् । तयोरेको विद्याप्रियः, अन्यो धनप्रियः । तयोः पितरौ अतीव दरिद्रौ । अतस्तौ पित्रोराज्ञया विदेशं गतौ ॥

विद्याप्रियस्तत्र विद्यालयं प्रविश्य विद्यामधीतवान् । अन्यः कस्यापि श्रेष्ठिनः आपणे व्यापृतः प्रभूतं वित्तमर्जति स्म ॥

दशभ्यो वर्षेभ्यः परं तौ स्वदेशं प्रति प्रस्थितौ। वनमार्गेण गच्छतोस्तयोः धनप्रियस्य धनभाण्डं चोराः अपाहरन्। तेन स निर्धनो जातः॥

यदा तौ स्वदेशमागतौ तदा विद्याप्रियं कृतविद्यं वीक्ष्य तद्दशीयो राजा तं मन्त्रिपदे न्ययोजयत्। धनप्रियस्तु जीविकार्थं गत्यन्तरम् अपश्यन् तस्यैव मन्त्रिणः सेवकोऽभवत्। विद्याया माहात्म्यं पश्यत ! अतएव 'विद्याधनं सर्वधनात् प्रधानम्' इति लोका आहुः॥

---

क) प्रश्नाः—१. कदा कुत्र द्वौ सखायावास्ताम्? २. तौ कीदृशौ? ३. कुतः तौ विदेशं गतौ? ४. विद्याप्रियस्तत्र किं कृतवान्? ५. अन्यः किमकरोत्? ६. कदा तौ स्वदेशं प्रति प्रस्थितौ? ७. तयोः कस्य किं चोराः अपाहरन्? ८. तेन स कीदृशो जातः? ९. कः तं मन्त्रिपदे न्ययोजयत्? १०. धनप्रियः किमकरोत्? ११. कस्मात् त्वं विद्याभ्यासं करोषि?

ख) 'रभ्' धातोः (to begin) (आत्मनेपदी) 'लङ्' रूपाणि—

| | | | |
|---|---|---|---|
| प्र. पु. | अरभत | अरभेतां | अरभन्त |
| म. पु. | अरभथाः | अरभेथां | अरभध्वम् |
| उ. पु. | अरभे | अरभावहि | अरभामहि |

ग) 'प्रविश्य, वीक्ष्य' इमे ल्यबन्ते अव्यये॥

घ) अर्जति स्म — अत्र व्याकरणविशेष कः?

ङ) 'लङ्' रूपैः वाक्यानि पूरयत—

१ अद्य मम स्वसा पतिगृहात्—(आगच्छ्।)

२ अहं ह्यः गृहात् पुस्तकम्—(आनय्।)

३ ह्यः सूर्यः न–(प्रकाश्।) ४ अस्माकं परीक्षा ह्यः–(आरभ्।)

च) 'एक, द्वि, त्रि, चतुर्' एतेषां रूपैः वाक्यानि पूरयत—

१ — वने — व्याघ्रः प्रतिवसति।

२ — गुच्छे — पुष्पाणि वर्तन्ते।

३ — बालकौ पथि — चोरम् अपश्यताम्।

४ — दशरथस्य — भार्यासु — पुत्राः अजायन्त॥

छ) संख्याशब्दस्य रूपाणि 5 to 19—

| | | |
|---|---|---|
| ५ पञ्च। | १० दश। | १५ पञ्चदश। |
| ६ षट्। | ११ एकादश। | १६ षोडश। |
| ७ सप्त। | १२ द्वादश। | १७ सप्तदश। |
| ८ अष्ट-अष्टौ। | १३ त्रयोदश। | १८ अष्टादश। |
| ९ नव। | १४ चतुर्दश। | १९ नवदश or एकोनविंशतिः। |

---

सखायौ *m* two friends
अतीव *in* very much
प्रभूतं *in* much
श्रेष्ठी *m* merchant
वित्तम् *n* wealth
विदेशः *m* foreign land
अर्जति स्म *P* earned
परं *in* after
अपाहरन् *P.* took away
निर्धनः *a.m.* poor
तद्देशीयः *a m.* native of that place
न्ययोजत् *P* appointed
जीविकार्थम् *in* for livelihood
आहुः *P.* (they) say
गत्यन्तरं *n* other means
सेवकः *m* servant
अभवत् *P.* (he) became

द्वाविंशः पाठः ॥ २२ ॥

---



## शुकः

| | |
|---|---|
| किमिति । | प्रायेण । |
| अतीव । | तस्मात् । |

अयं शुकः पञ्जरे बद्धस्तिष्ठति । पञ्जरं लोहस्य शलाकाभिः निर्मितम् । किमिति शुकाः पञ्जरे बध्यन्ते ? शुकाः खलु शिक्ष्यमाणाः स्फुटं भाषन्ते । अतः शुकान् गृहीत्वा जनाः पञ्जरे स्थापयन्ति शिक्षयन्ति च ॥

शुकानां रूपमपि रुचिरम् । तेषां पक्षौ हरितौ । चञ्चुश्च लोहिता । केचन शुकाः चित्रावर्णाः सन्ति । तेऽतीव मनोहराः ॥

शुकाः प्रायेण उष्णदेशेषु जायन्ते। वृक्षाणां कोटरेषु पाषाणानां छिद्रेषु वा ते निवसन्ति। पक्वानि फलानि शालिं मरिचं च ते भक्षयन्ति। लवणं शुकानां विषम्। तस्मात् लवणेन मिश्रितं भक्ष्यं मा यच्छ शुकेभ्यः॥

---

क) प्रश्नाः—१. कः कुत्र बद्धः तिष्ठति? २. पञ्जरं कथं निर्मितम्? ३. शुकानां रूपं कीदृशम्? ४. तेषां पक्षौ कीदृशौ? ५. चञ्चुः कीदृशी? ६. अतीव मनोहराः शुकाः के? ७. शुकाः प्रायेण कुत्र जायन्ते? ८. कुत्र ते निवसन्ति? ९. किं ते भक्षयन्ति? १०. किं शुकानां विषम्?

ख) पञ्चन्, षष्, सप्तन्, अष्टन्, नवन्, दशन्—एतेषां संख्याशब्दानां रूपैः वाक्यानि पूरयत—

१ इह — बालकाः — बालिकाश्च आगच्छन्ति।
२ — श्लोकानाम् अर्थं वर्णयत।
३ — भृत्याः — दिनैः तत् कर्म कुर्वन्ति।
४ अस्यां वीथ्यां — गृहाणि सन्ति।
५ प्रभुः — भृत्येभ्यः वेतनम् अयच्छत्।
६ पाण्डोः — पुत्राः अजायन्त॥

ग) पठत —

ते + अतीव = तेऽतीव। भूयः + अपि = भूयोऽपि। नद्यः + अपि = नद्योऽपि। सखायौ + आस्ताम् = सखायावास्ताम्

घ) 'रमणीय' शब्दस्य रूपैः वाक्यानि पूरयत—

१ अयं—अश्वः। ३ एतत्—पुष्पम्। ५ एतानि—फलानि।
२ एषा—लता। ४ इमे — पात्रे। ६ शुकाः — खगाः॥

ङ) Note that Adjectives must agree with their Nouns in Gender, number, and case e. g. पाठालयः निर्मितः ; पाठशाला निर्मिता ; पञ्जरं निर्मितम्।

च) 'रभ्' धातोः (to begin) (आत्मनेपदी) 'लोट्' रूपाणि—

| | | | |
|---|---|---|---|
| प्र. पु. | रभतां | रभेतां | रभन्तां |
| म. पु. | रभस्व | रभेथां | रभध्वं |
| उ. पु. | रभै | रभावहै | रभामहै |

---

शुकः *m* parrot
किमिति *in.* why?
प्रायेण *in.* mostly
अतीव *in.* very
तस्मात् *in.* therefore
पञ्जरं *n* cage
लोह *m. n.* Iron or any metal
शिक्ष्यमाणाः *a. m.* being taught
स्फुटं *in.* distinctly
भाषन्ते *A.* speak
रुचिरं *a. n.* charming
हरितः *a. m.* green
चञ्चुः *f* a beak
लोहिता *a. f.* red
मनोहराः *a. m.* lovely
जायन्ते *A.* are born
कोटरं *n* hollow of a tree
पाषाणः *m* stone
छिद्रं *n* hole
पक्वः *a. n.* ripe
शालिः *f* paddy
मरिचं *n* pepper (here it means chilli)
मिश्रित *a.* mixed with
लवणं *n* salt
मा *in.* यच्छ *P.* don't give

श्री

## Jaya rAma ramA ramaNam

- from Sri Ram Charita Manas (the Ramayana of Goswami Tulasidas)

rAga: Jaijaivanti *(Hindustani)* / Dwijavanti *(Carnatic)*
*tAla: Keherwa (Hindustani)* / Adi *(Carnatic)*

जय राम रमारमणं शमनं भव ताप भयाकुल पाहि जनम्
महि मण्डल मण्डन चारुतरं धृत सायक चाप निषङ्ग वरम्

मुनिमानस पङ्कज भृङ्ग भजे रघुवीर महारण धीर अजय
तव नाम जपामि नमामि भव रोग महा मद मान हरे

गुण शील कृपा परमायतनं प्रणमामि निरन्तर श्रीरमणम्
रघुनन्द निकन्दय द्वन्द्व घनं महिपाल विलोकय दीनजनम्

jaya rāma ramāramaṇaṁ śamanaṁ bhava tāpa bhayākula pāhi janam
mahi maṇḍala maṇḍana cārutaraṁ dhṛta sāyaka cāpa niṣaṅga varam

munimānasa paṅkaja bhṛṅga bhajē raghuvīra mahāraṇa dhīra ajaya
tava nāma japāmi namāmi bhava rōga mahā mada māna harē

guṇa śīla kṛpā paramāyatanaṁ praṇamāmi nirantara śrīramaṇam raghunanda
nikandaya dvandva ghanaṁ mahipāla vilōkaya dīnajanam

ॐ

## ॐ अथ पञ्चदशोऽध्यायः Oṁ atha pañcadaśo'dhyāyaḥ

श्रीभगवानुवाच ।

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलं असङ्गशस्त्रेण दृढेन छित्त्वा ॥

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैः गच्छन्त्यमूढाः पदमव्ययं तत् ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥

*śrībhagavān uvāca*

*ūrdhvamūlam adhaḥśākham aśvatthaṁ prāhuravyayam*
*chandāṁsi yasya parṇāni yastaṁ veda sa vedavit*

*adhaścordhvaṁ prasṛtāstasya śākhāḥ*
*guṇapravṛddhā viṣayapravālāḥ*
*adhaśca mūlānyanusantatāni*
*karmānubandhīni manuṣyaloke*

*na rūpam asyeha tathopalabhyate*
*nānto na cādirna ca sampratiṣṭhā*
*aśvattham enaṁ suvirūḍhamūlaṁ*
*asaṅgaśastreṇa dṛḍhena chittvā*

*tataḥ padaṁ tat parimārgitavyaṁ*
*yasmin gatā na nivartanti bhūyaḥ*
*tam eva cādyaṁ puruṣaṁ prapadye*
*yataḥ pravṛttiḥ prasṛtā purāṇī*

*nirmānamohā jitasaṅgadoṣāḥ*
*adhyātmanityā vinivṛttakāmāḥ*
*dvandvairvimuktāḥ sukhaduḥkhasañjñaiḥ*
*gacchantyamūḍhāḥ padam avyayaṁ tat*

*na tad bhāsayate sūryaḥ na śaśāṅko na pāvakaḥ*
*yad gatvā na nivartante tad dhāma paramaṁ mama*

*mamaivāṁśo jīvaloke jīvabhūtaḥ sanātanaḥ*
*manaḥṣaṣṭhānīndriyāṇi prakṛtisthāni karṣati*

*śarīraṁ yad avāpnoti yaccāpyutkrāmatīśvaraḥ*
*gṛhītvaitāni saṁyāti vāyurgandhān ivāśayāt*

*śrotraṁ cakṣuḥ sparśanaṁ ca rasanaṁ ghrāṇam eva ca*
*adhiṣṭhāya manaścāyaṁ viṣayān upasevate*

*utkrāmantaṁ sthitaṁ vāpi bhuñjānaṁ vā guṇānvitam*
*vimūḍhā nānupaśyanti paśyanti jñānacakṣuṣaḥ*

*yatanto yoginaścainaṁ paśyantyātmanyavasthitam*
*yatanto'pyakṛtātmānaḥ nainaṁ paśyantyacetasaḥ*

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

*yad ādityagataṁ tejaḥ jagad bhāsayate'khilam*
*yaccandramasi yaccāgnau tattejo viddhi māmakam*

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥

*gām āviśya ca bhūtāni dhārayāmyaham ojasā*
*puṣṇāmi cauṣadhīḥ sarvāḥ somo bhūtvā rasātmakaḥ*

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

*ahaṁ vaiśvānaro bhūtvā prāṇināṁ deham āśritaḥ*
*prāṇāpānasamāyuktaḥ pacāmyannaṁ caturvidham*

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥

*sarvasya cāhaṁ hṛdi sanniviṣṭaḥ*
*mattaḥ smṛtirjñānam apohanaṁ ca*
*vedaiśca sarvairaham eva vedyaḥ*
*vedāntakṛd vedavid eva cāham*

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

*dvāvimau puruṣau loke kṣaraścākṣara eva ca*
*kṣaraḥ sarvāṇi bhūtāni kūṭastho'kṣara ucyate*

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

*uttamaḥ puruṣastvanyaḥ paramātmetyudāhṛtaḥ*
*yo lokatrayamāviśya bibhartyavyaya īśvaraḥ*

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

*yasmāt kṣaram atīto'ham akṣarād api cottamaḥ*
*ato'smi loke vede ca prathitaḥ puruṣottamaḥ*

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥

*yo mām evam asammūḍhaḥ jānāti puruṣottamam*
*sa sarvavid bhajati māṁ sarvabhāvena bhārata*

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥

*iti guhyatamaṁ śāstram idam uktaṁ mayānagha*
*etad buddhvā buddhimān syāt kṛtakṛtyaśca bhārata*

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥

*oṁ tatsat iti śrīmadbhagavadgītāsu upaniṣatsu brahma-vidyāyāṁ yoga-śāstre*
*śrīkṛṣṇārjunasaṁvāde puruṣottama-yogo nāma pañcadaśo'dhyāyaḥ*

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः ॥

*sarvadharmān parityajya mām ekaṁ śaraṇaṁ vraja, ahaṁ tvā sarvapāpebhyaḥ mokṣayiṣyāmi mā śucaḥ*

हरिः ॐ *hariḥ oṁ*

ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

*oṁ brahmārpaṇaṁ brahma haviḥ brahmāgnau brahmaṇā hutam*
*brahmaiva tena gantavyaṁ brahmakarmasamādhinā*

[ॐ नमःपार्वतीपतये] हर हर महादेव [*oṁ namaḥ pārvatī pataye*] *hara hara mahādeva*